षाद्यः मेषस्तृतीयः मिथुनस्तृतीयः सिंहो द्वितीयः सिंहस्तृतीयः कन्यातृतीयः तुलस्तृतीयः वृश्चिकस्तृ
तीयः धनुराद्यश्च ॥ खगद्रेष्काणः मिथुनद्वितीयः सिंहाद्यः तुलद्वितीयः कुंभाद्यश्च तत्रापि गणद्वयान्तर्भूतं
द्रेष्काणस्थे चन्द्रे फलद्वयं वक्तव्यम् ॥ ६ ॥ अधुना मेषादिनवांशकजातस्य स्वरूपं मालिन्याह ॥ स्तेनो भोक्ता पंडि
ताढ्यो नरेंद्रः क्लीबः शूरो विष्टिकृद्दासवृत्तिः ॥ पापो हिंस्रो धीश्च वर्गोत्तमांशे ख्याताः सीराशिवद्द्वादशांशैः
॥ ७ ॥ मेषवर्ज मन्यास्मिन् राशौ लग्नगते मेषनवांशके जातः स्तेनश्चौरो भवति वृषवर्जिते वृषनवांशके जा
तः भोक्ता अर्थसंचयशील: एवं मिथुननवांशके जातः पंडितो विद्वान्भवति कर्कटांशके जातः आढ्यः ईश्व

धनुराद्यः धन्विस्तृतीयश्च ॥ चतुष्पदद्रेष्काणः मेषद्वितीयः वृषस्तृतीयः कर्कटप्रथमः सिंहाद्यः सिंहस्तृतीयः ६

र: सिंहांशके जात: नरेन्द्रो राजा कन्यांशके जात: क्लीबः ऊरुस्वबाहुमरहितः तुलांशे शूरः संग्रामप्रियः वृश्चिकां
शके विष्टिकृत्प्राज्ञजीवी॥ धन्वंशके दासवृत्ति: मकरांशके पाप: कुंभांशके हिंस्रक्रूर: मीनांशकेऽशनी: चुवि
मान्भवति॥ केचिदंशीरिति पटन्ति निर्भयः आचार्यस्याभीरिति मतम्॥ तथा च स्वल्पजातके॥ तस्करभोक्तृवि
चणधनिनृपतिनपुंसककाभयदासपापहिंस्रा: स्वलपापोरोत्स्वरामेषादीनांनवांशभावइति॥ वर्गोत्तमांशेष्वेवामीषा
ए स्वेष्वेवराशिषु वर्गोत्तमांशेषु जाताः एतामेव पूर्वोक्तानामीषां स्वामीनो भवंति॥ एतदुक्तं भवति मेषलग्ने मे
षलग्ने मेषनवांशे जात: चौरस्वामी भवति॥ वृषलग्ने वृषनवांशे जात: पंचायशीलानां स्वामी एवं मिथु
ने पंडितस्वामी कर्कटे ईश्वराणां स्वामी सिंहे नृपस्वामी कन्यायां क्लीबस्वामी तुले शूराणां स्वामी वृश्चिके भार
वाहाणां स्वामी धन्विदासानां स्वामी मकरे पापानां स्वामी कुंभे क्रूराणां स्वामी मीने मीनांशके शुचिमतां अभ
यानां स्वामी भवति॥ एवं च द्वादशांशेष्वपि द्वादशांशे राशिवशात् फलानि वाच्यानि मेषादिस्थचंद्रमसि फल
न्यभिहितानि॥ चन्द्रजातादिषु वृत्तजातकस्य द्वादशांशके जातस्य वक्तव्यानीति॥७॥ अथ भौमसौर
यो: स्वत्रिंशांशकस्थयो: स्वत्रिंशांशकस्थफलं वसंततिलकेनाह॥ जायान्वितो बलविभूषणसत्वयुक्तो योति
नाह युतः क्रूरकुजस्वभावो॥ सौरीस्तत्स्वयुवतिर्विषमोन्यदाररोदुष्टः परिच्छदयुतो मलिनोर्कपुत्रे॥८॥ जायान्वितः
भार्यायुक्तः बलविभूषणसत्वयुक्तः वीर्यालंकारणोदार्योपेत: तेजसा कान्त्यायुतः अतसाहस्युतः अक्षमी
विकाश्मरणशील: एवंविधः कुजे भौमे स्वत्रिंशांशकस्थे जातो भवति रोगी व्याधित: सतयुवतिः अन्यासाली
यायुवतिर्यस्य विषम: क्रूर: अन्यदाररत: परदारासक्तः दुष्टो निस्सुख: परिच्छदयुत: गृहवस्त्रपरिचारोपेत: म
लिन: मलोपेत: एवंविधोर्कपुत्रे सौरे स्वत्रिंशांशकगृहणां भविष्यतीति॥८॥ अथ जीवबुधयोः स्वत्रिंशांशकस्थ
योर्जातस्य फलं वसंततिलकेनाह॥ ... धनयशःसुखबुद्धियुक्तो तेजस्वी ... भोगवर्जितः॥

वहेश: ॥ अथ कुंभलग्ने जातस्याशुभस्थानमुक्तं जातिकयाह॥ न कुंभलग्नं शुभमाह सत्यो न भाग
भेदाद्यवना वदन्ति॥ कस्मांशभेदो न यथास्ति तस्मात्प्रसंगात् श्येत् इति विष्णुगुप्तः॥३॥ सत्याचा
र्य: कुंभलग्नं जन्मनि न शुभमाह॥ न शोभनं तु कं वाक्यं तथा च सत्य:॥ जन्मनि चन्द्र: अथ: प्रवदे
द्वौ रा निधनं च वर्जम् होराश्च मध्ये दिशा हि पदे ष्टि ह कुंभ घर वर्जम्॥ न भागभेदादिति यवना यवना भाग
भेदाद्द्वादशभागभेदाज्जन्मनि कुंभलग्नं न ष्टभमिति तेषां मतं न कुंभलग्ने तथा च तन्मतानुसारिणाश्रु
तिकीर्तिनाप्युक्तम्॥ सर्वाभिन्नलग्नगति कुंभद्विरंशको यदा भवति॥ शोभनश्च दासु स्विन: परान्न
भोजी भवेत्पुरुष इति॥ विष्णुगुप्तश्चाणिक्य आह॥ कस्मांशभेद इति॥ यदुक्तं भागभेदात् कुंभलग्न
जन्मनि न शुभं तत्कस्य राशेरंशे न गतस्य कुंभद्वादशभागेन शुभस्तदा सर्वाण्येव लग्नानि फलानि
निरर्थकानि भवन्ति॥ तस्माद् अतिप्रसंगात्तेन कुंभलग्नमेवाशुभं न तद्भागभेद इति॥ तथाप्नत द्वादश॥
कुंभद्वादशभागो लग्नगतो न शुभं स्यात् यवनै:॥ यद्येवं सर्वेषां लग्नगतानामनिष्टफलता स्यात् एवं यो
गाद्यभीनां नमत: तत्सर्वशास्त्रकाराणाम् तस्मात्कुंभविलग्नं जन्मन्यशुभं न तद्भाग इति॥३॥ अथधु
नाहामरस्थानानां ग्रहाणां फलं वसंततिलकेनाह॥ यातेष्वसत्स्वसममेषु दिने शुहोरां रव्यातो महौज
सफलार्घ्ययुतो नितेजा:॥ चान्द्री शुभेषु युजि मार्दव कांति सौख्य भाग्यधीमान्मधुरवाक्ययुत: प्रजात:॥
४॥ अथ सूर्यहोरा: पापा: ते असत्सु सममेषु विसमराशौ अवस्थितेषु न केवलं यावत् दिने सूर्य होरा

रंध्रादिस्थे होरायां तेषु प्राप्तेषु विषमराशिषु पापाः प्रथमावस्थापदा भवन्ति ॥ तदा जातः स्यात्तस्करवृत्र
ऽसिद्धः महोद्यमफलार्थी पुत्तः महत्सु कार्येषूद्यमरतः बलवाननर्थयुतः अतितेजस्वी भवति ॥ चान्द्रीषु भे वि
तिथुजिषु ग्रहेषु सौम्यगृहेषु चान्द्रीं होरायां याते शुभमराशिषु प्रथमावस्थायां सौम्या भवन्ति तदा
जातः सद्दृत्तभावः कांतियुतो द्युतिमान् सौभाग्ययुतो भोगी सौभाग्ययुतः सर्वजनप्रियः धीमान् मधुरवा
क्यः प्रियंवदः एतैर्गुणैर्युक्तो जातो भवति ॥ ८ ॥ अथ पुनरपि होरागतं तं लेपे मिश्रयन्नाह ॥ तास्वेव होरा
स्वपरहोरेषु ते यान्तराः पूर्वगुणैः क्रमसमध्याः ॥ अथ्यस्तु होराभवनस्थितेषु मध्येभवनस्तु गुणैर्वि
हीनाः ॥ ५ ॥ तास्वेव पूर्वोक्तास्व होरास्वपरहोरागम्यराशौ स्थिता सुजातानराः पूर्वगुणेषु मध्या भवंति पूर्वो
क्तगुणमध्यमा भवन्ति ॥ सूर्यादेर्व विषमराशौ च चन्द्रे होरागतास्सौम्या भवंति ॥ तदा जातस्य पूर्वो
क्तगुणमध्यमा भवन्ति यद्यत्ते त्यादि व्यत्यस्तासु विपरीतासु होरासु व्यत्यस्तेषु च भवनेषु राशिषु ग्र
हेषु जाता मर्त्या मनुष्याः उक्तगुणैः प्रागुणैः विहीना वर्जिता भवंति ॥ एतदुक्तं भवति ॥ सममराशिषु
चन्द्रहोरायां पापानामवस्थानं भवति तदा जातो महोद्यमबलार्थहीनो भवति ॥ वितेजाश्च एवं वि
षमराशौ याद्यादित्यहोरायां व्यवस्थानं सौम्यानां भवति ॥ तदापि जातो मार्दवकान्तिसौख्यसौभाग्यधीमधु
रवाक्यविहीनो जातो भवति तत्र चद्रर्शितिगृहव्यस्थाने यथायथा गृहवरूत्वं भवति ॥ तत्पात यापफल
वरूत्वेन तत्र्यम् ॥ ५ ॥ अथ पञ्चकोणावस्थानाच्छ्रनूस्य फलं च संततिलकेनाह ॥ कल्याणरूपगुणमा

णमसंस्थानां मतभेदत्वं भवति तत्राचार्यो मतद्वयं प्रदर्शयति यथाचरस्यात्रामामध्यस्थायां ग्र
हकुंडलिकायां स्वल्पयात्रायामध्यल्पा भवति ॥ एवं च ग्रहस्य योर्विंशाद्वयलेपाः ॥ १ ॥ अथग्र
हकुंडलिकाफलस्यापि विशेषार्थमनुष्टुभाह ॥ उच्चत्रिकोणस्वसुहृच्छत्रुनीचगृहार्कगैः ॥
शुभं संपूर्णपादोनदलपादाल्पनिष्फलम् ॥ ११ ॥ ग्रहकुंडलिकाफलं द्विविधं शुभमशुभं च ।
तत्र प्रथमं शुभफलं तदुच्चस्थो ग्रहः संपूर्णं प्रयच्छति मूलत्रिकोणस्थः पादोनं प्रयच्छति स्वक्षेत्र
स्थोऽर्धं मित्रक्षेत्रस्थः पादं शत्रुक्षेत्रस्थः पादस्याल्पं नीचस्थोऽस्तमितश्च निष्फलं न किंचिदपि ॥ अशु
भग्रहाणामशुभग्रहाणामशुभस्यायं क्रमः व्यत्ययः तत्रास्तमितो नीचस्थश्चाशुभं ग्रहः पूर्णं द
दाति शत्रुक्षेत्रस्थः पादोनम् मित्रक्षेत्रस्थोऽर्धम् स्वक्षेत्रस्थः पादम् त्रिकोणस्थः पादस्याल्पम्
उच्चस्थो न किंचिदपि ॥ एवं जातककालग्रहस्थानावस्थानफलं वाच्यम् ॥ दशाष्टकवर्गादि फलपाक
काले शुभमशुभं वा फलं पुण्यं वा फलं चैव प्रयच्छति ॥ एतत्पूर्वं व्याख्यातम् ॥ अथात्र वैकालकार्यः ॥
तत्काणवक्रजन्मे दशाष्टदसादेरोनस्य फलं जन्मवि सुहृच्च ध्यधीणस्त्रमेव पुरुषम् ॥ ११ ॥ इति महोत्पलवि
रचितायां बृहज्जातकविवृत्तौ भावाध्यायोऽष्टादशः सर्गः ॥ १८ ॥ अथातः अथयोगाध्यायो व्याख्या
यते ॥ तत्रैवादौ कादिसंख्यानेव व्याख्या ग्रहगतानां ग्रहाणां मित्रक्षेत्रगतानां च फलं प्रदर्शितात्रयाह ॥
कुलसमकुलमुख्यबंधुपूज्याधनिसुखिभोगिनृपाः स्वभैकेक्रमात् ॥ परविभवसुहृत्स्ववंधुपो
ष्या गणपबलेशनृपाश्च मित्रभेषु ॥ स्वभेषु पञ्चमगुरुपुष्पचन्द्रादिस्थिते हीनमातः कुलमुख्य । 71

निःस्वो रोगी च ॥५॥ एकेनोच्चगतेन ग्रहेण मित्रदृष्टः सुहृद्बलेनैव वित्तेन पदं नयति प्रजानं कुल्याद्यपि राजमेको प्युच्चगतो मित्रयोगात्
त्रयेण त्वात्रतुर्धनसमेतं यदि पूर्वविहितं क्रमसे सर्वभावाः प्रजनयति विवस्य विसुखस्वादेवं कुलमनुवर्तते ॥ एवं ५५

कुलज्योतिः
बंधुप्रज्यायनसुखभोगान्पाजाताः उरुधामवत्ति ॥ यस्मिंस्तामिंन्नेवस्मिन्गृहे स्वदेवगतेजा
तः कुलसमः स्वकुलतुल्योभवति ॥ एवं द्वयोः कुलमुख्यैः कुलप्रधानः कुलाधिकः त्रिषु बंधुनां प्र
ज्यः चतुर्षु धनी वित्तवान् पंचसु सुखी षट्सु भोगीन्पतुल्यः केचित् पठंति पठन्ति सप्तपमाना
नृपति वत्सममेयो नेत्र स्वल्पजातके प्युक्तं ॥ कुलतुल्यकुलाधिकबंधुमान्यभोगीन्पसमनरेन्द्र
रति ॥ एवं यत्सु समाः सप्रसुन्वो राजा ॥ परविभवेत्यादि एकस्थानुवर्तते मित्रभेष्ववेचस्था
स्थिते पु पारिभिः भवसुहृत्स्वबंधुयोष्यागाणपवलेष्वान्पाञ्जाता भवंति ॥ तनेकस्मिन्मित्रदेव
स्थगृहे जातः परविभवपोष्यो भवति परजीवी त्वर्थः द्वयेसुहृत्पोष्यः त्रिषु स्वपोष्यः ताति पोष्यः स्व
तुर्षु बंधुपोष्यो भ्रातपोष्य इत्यर्थः पंचसु गणपो गणस्वामी ॥ षट्सु बलेशो बलस्वामी सप्तसु नृपो
राजा ॥ अथ च्युत गतैरेकस्याधि मित्रदृष्टस्य फलमेकोत्तरवृद्ध्या शत्रुनीचस्थानां च मालिन्याह ॥ जन
पति नयमेको प्युच्चगतो मित्रदृष्टः प्रचुर धनसमेतं मित्रयोगाच्च सिद्धम् ॥ विवस्त्रुविभवमङ्याधि
ताबंधुतप्त विधदुरितसमेताच्च त्रुदेवनीचागोचाभवंदिनाविवसुविगतधनोभवति ॥ दरिद्रः पस्ये
स्यविसुखात्तु द्विविधकोण मस्तु देवगोनीचागोवाभवंति सविवसु विगतधनोभवति ॥ दरिद्रः पस्य
दोसविसुखः दुःखितः यदुःखदुःखसंतप्तः यस्य सप्तसु दुरितसमेतो वध्यो भवति ॥ दुरितं दुष्कृतं वध
एवंतेषु तः समेत स्वंपु क्तः नीचे यद्यपि सप्तनसंभवति ॥ न चापि वज्राद्वेवत्स्वर्वशास्त्रानुसारे णात्यावो

एवानन्यतमो राशीप्रदिलान्निगतो भवति तत्र स्यच सौरेन्दपति सद्दृशः राजतुल्यः ग्रामाणां पुराणां चाधि
पतिः सुविधानीति पंडितः चार्थगः शोभनाचयवस्य भवति ॥ केचित्तु हत्स्वदेवस्यादि इति पठंति तद्द्यु
व
क्तम् ॥ युक्तसारो स्यात्तु क्रूरः ॥ सोपे स्वजीवनो धनेहितपापतुल्यो लानेकजे भवति देशानगधिनपः ॥
शमेषु दुष्कृत गद पीडित एवबाल्ये दारिद्र्यकामवशगो मलिनोलसश्च ॥ अन्यत्र द्वितीयादिषु स्थाने बुद्धि
न्नपहृत धनो च क्रूरो रोगी च भवति ॥ तृतीये मतिविक्रमान् चतुर्थे विसुखः पीडित मानसः पञ्चमेऽस्तु
तो धनवर्जितश्च षष्ठे बलवान् शत्रुजितश्च सप्तमे जीजितः परिभवंगतः अष्टमे स्वस्सात्मजः विः
कले दरणाश्च नवमे सुतार्थसुखभाक् दशमे सुतशौर्यभाक् एकादशे प्रभूतधनः द्वादशे पतित इति ॥ ८
दृति प्रानेश्च रचारं ॥ ८ ॥ अथ लग्नादा भ्ययेतन्वादयो भावास्तेषु भावेषु व्यवस्थितानां सर्वेषामेव ग्र
हाणां फलविशेषं मालिन्याह ॥ सुहृदरिपरकीयस्वर्क्षतुंगस्थितानां फलमनुपरिकल्प्य लग्नदेह
दि भावेः ॥ समुपचयविपत्ती सौम्यपापेषु सत्यं व्यपयति विपरीतं रिष्फ षष्ठाष्टमेषु ॥ १ ॥ यदेतत्
स्यतिगृहं लग्नात्प्रभृति द्वादशस्थानेषु भावफलमुक्तम् एतन्नावदृष्टव्यम् नवेवलं याव ग्रहप
लमपि वक्तव्यम् ॥ भावास्तु तनुकुटुंबसहोत्थाद यन्नाम्नि दिहादि भावेरिति लग्नं देहः शरीरं परिक
ल्प्य लग्नाद्यारभ्य तनुकुटुंबसहोत्थादयो भावाः परिकल्प्याः तत्र काश्चाद्भिरुच्यते ॥ अत्रैव ॥ यस्माद्यत्र
नेश्वरः ॥ मूर्तिं देहं संपापी भं च विन्यादितः ॥ तत्र प्राप्ती दुपरिकल्प्या लग्नाद्यपरिकल्प्याः तेषु शरीरादि
भावेषु योग्रहः व्यवस्थितस्तस्य भावस्य प्रिंकृशोलं वा करोति ॥ प्रथममित्याह ॥ सुहृदरिपरकी

पस्वर्क्षेत्रगतस्थितानां फलमनुपरिचिन्त्यमिति॥ सुहृत्क्षेत्रं मित्रभं अरिक्षेत्रं शत्रुभं परकीयमुदासीनं
स्वर्क्षमात्मीयक्षेत्रं तुङ्गं उच्चं भम्॥ एतेषु स्थितानां फलमनुपरिचिन्त्यम्॥ परिकल्प्यम्॥ भावस्याग्रे
यादृशे क्षेत्रे भवति। तादृशं फलं प्रयच्छति तत्र सुहृदामादिक्षेत्राणां गणनाकृता तत्र शुभाशुभविभाग
उक्तः। शुभादिषु तत्र मित्रादिक्षेत्रस्थो भावस्य वृद्धिं करोति। शत्रुक्षेत्रादिस्थो हानिम्। अत्र चायं
शुभाशुभक्षेत्रे नीचे त्रिकोणे नीचगतेपि ग्राह्यम् मित्रक्षेत्राणि स्वोच्चे फलदानार्थं नित्यानि [illegible] उनः
परकीयपापविशेषउदासीनेऽशुभयोर्न प्रीतः। अपि स्युः परः उदासीनः तत्रैतदुक्तम्॥ नीचस्थः
शत्रुक्षेत्रस्थो वा यस्मिन्भावे व्यवस्थितः स तस्य भावस्य हानिं करोति। उदासीनक्षेत्रेण हानिर्न वृद्धिः।
ल मित्रक्षेत्रे स्वक्षेत्रे मूलत्रिकोणे व्यवस्थितः स भावस्य वृद्धिं करोति। [illegible] मतमुपलक्षणा
र्थं॥ नीचर्क्षे रिपुगेहस्थो ग्रहो भावविनाशकृद् इति॥ तथा च सत्यः॥ सत्तुपचयपतीसोभा व्यपा
यश्च [illegible] सौम्याः पुष्टिं पापा विपर्ययं संख्याता कुर्युरिति यस्मिन्भावे सौम्याः स्थिताः त
स्मिन्भावे निरीतिः॥ किन्त्वेतद्विपरीतं सूरिभिरुक्तं रिष्फ व्ययस्थाने सौम्यो व्ययहानिं करोति॥
पापो व्ययवृद्धिं करोति षष्ठस्थाने सौम्यः शत्रुहानिं करोति पापो [illegible] वृद्धिं करोति॥ तत्रोच्यते ए
वं सामान्येनोक्तम् [illegible] नैको बाधा भवति॥ तत्र सामान्यफलमल्पत्वात् [illegible] फलं च
[illegible]॥ षष्ठं फलं स्वल्पजातके [illegible] भावानां [illegible] स्थितापायाः
इति॥ अत्रोच्यते [illegible] जातके आचार्यमतेनोक्तम्॥ स्वल्पजातके आचार्यमते प्रतिज्ञा [illegible]
[illegible]॥ [illegible] प्रतिपन्नेन योग्यमस्माकम् इति यत्राचार्या

दृष्ट्वा कुत्सितान्नाशी भवति॥ धर्मे नवमे अघवान् पापरतो भवति दिनकरप्रतिमोन्यस्थः अन्त्ये
षु परिशिष्टस्थानेषु स्थितो दिनकरप्रतिमो रवितुल्यः ततः पञ्चचतुर्थपंचमषष्ठसप्तमाष्टमदशमैका
दशद्वादशेषु यान्यादित्यस्य फलान्यभिहितानि तानि भौमस्य वाच्यानि तद्यथा॥ द्वितीये मतिविक्र
मवान् चतुर्थे विसुखः पीडितमानसः पंचमे असुतो धनवर्जितः षष्ठे मेबलवान् प्रथितः सप्तमे स्त्री
भिः परिभवगतः अष्टमे स्वल्पात्मजो विकलेक्षणः दशमे सुतसौर्यभाक् एकादशे प्रभूतधनवान्
द्वादशे पतितः इति॥ इति भौमचारः॥३॥ विदुकुहनीत्यादि॥ लग्ने बुधे लग्नगते विद्वान्पंडितः भवति द्वि 75
तीये धनवान् तृतीये प्रबलः [illegible] दुर्जनः चतुर्थे पंडितः पंचमे मंत्री षष्ठे अशत्रुर्विगतारिः सप्त
मे धर्मज्ञः अष्टमे विख्यातः प्रख्यातगुणः परतोनेषु समर्कवत् [illegible] नवमदशमैकादशद्वाद
शेषु यान्यर्कस्य फलान्यभिहितानि तान्येव बुधस्य वाच्यानि नवमे सुतार्थसुखभाक् दशमे सुतसौर्यभा
क् एकादशे प्रभूतधनवान् द्वादशे पतितः इति॥ इति बुधचारः॥४॥ अथ लग्नादिस्थस्य जीवस्य फलानि
[illegible]॥ विद्वान्सुवाक्यः कृपणः सुखी च धीमानशत्रुः पितृकोपि कष्टः॥ नीचस्तपस्वी सधनः सला
भः खलश्च जीवे क्रमशो विलग्नात्॥७॥ जीवे बृहस्पतौ विलग्नात् प्रभृतिस्थिते द्वादशस्थानेषु क्रमे
णः प्रतिपाद्येनानि लग्नस्थे गुरौ विद्वान् पंडितो भवति॥ द्वितीये सुवाक्यः शोभनवाक्यो भवति तृतीये कृ
पणः सुखी चतुर्थे सुखी पंचमे धीमान्बुद्धिमान्भवति षष्ठे अशत्रुः विगतरिपुः सप्तमे पितृतो
ऽधिकः पितुः सकाशाद्गुणैरन्वितः॥ अधिकः अष्टमे नीचः स्वकुलानुचितकर्मकृत् नवमे तपस्वी त
पोधर्मशीलः दशमे सधनः एकादशे सलाभः द्वादशे खलः क्रूरचेष्टः इति॥ इति बृहस्पतिचारः॥५॥

76

अथ लग्नादिस्थस्य शुक्रस्य स्वरूपं दोधकेनाह ॥ स्मरनिपुणस्सुखवांश्च विलग्ने प्रियकलहोऽस्त-
गते सुरतेप्सुः ॥ तनयगते सुखितो भृगुपुत्रो गुरुवदतोऽसुतवृविगीस्यात् ॥ ८ ॥ स्मरनिपुणः कामकु-
शलः सुखभाक् भोगी एवंविधो लग्नस्थे भृगुः पुत्रे शुक्रे जातो भवति प्रियकलहे । अभिमतकोलाहलः
सुरतेप्सुः कामाभिलाषी एवंविधो लग्नगते सप्तमे शुक्रे जातो भवति तनयगे पंचमस्थे शुक्रे सुखितो भ-
वति ॥ गुरुवदत्र अतोनंतरं परिशिष्टेषु स्थानेषु गुरुवज्जीववत् द्वितीयतृतीयचतुर्थषष्ठाष्टमनवम-
दशमैकादशद्वादशेषु यान्येव गुरोर्बृहस्पतेः स्थानान्यभिहितानि तान्येव शुक्रस्य वक्तव्यानि तद्य-
था ॥ द्वितीयस्थो वाग्मी भवति तृतीये कृपणः चतुर्थे सुखी पंचमे धीमान् षष्ठे अशत्रुः अष्टमे नीचः
नवमे धर्मरतः तपस्वी दशमे सधनः एकादशे सलाभः द्वादशे मध्यबलः न्यकुविर्गिणिस्यात् पत्रपत्रश-
त्रोऽत्रधमोनोयदा भवति शुक्रस्तदा स्थानोक्तं फलमत्र स्याभवति ॥ अर्थाविद्वान् धनवांश्चैत ॥
इति शुक्रचारः ॥ ९ ॥ अथ लग्नादिस्थस्य सौरस्य फलं शिखरिण्याह ॥ अदृष्टार्थो रोगी मदनव-
शगोऽत्यंतमलिनः शिशुत्वे पीडार्तः सवितृसुतलग्नेऽलसवाक् ॥ गुरुस्वोच्चे द्विस्थे नृपतिसदृ-
शो ग्रामपुरपः सुविद्वांश्चार्वंगो दिनकरसमोऽन्यत्र कथितः ॥ १० ॥ अदृष्टार्थो नित्यदरिद्रः रोगी व्या-
धितः मदनवशगः कामाधीनः अत्यंतमलिनः अतीव मलोपेतः शिशुत्वे बाल्ये पीडार्तः व्याध्यादि-
तः अलसवाक् गद्गदवाक् ॥ एवंविधः सवितृसुते सौरे लग्नस्थे जातो भवति ॥ यदि तुलाधनुर्मकरकुं-
भमीनानामन्यतमो राशिर्लग्नगतो भवति तदेतदुक्तं भवति ॥ एषामन्यतमे लग्नगतस्य सौरस्य फ-
लं नाह ॥ गुरुस्वोच्चे ऽजस्थ इति गुरुरुच्चे त्रिधन्विमीनौ पराने स्वस्य स्वक्षेत्रे मकरकुंभौ तस्थे लग्ने तुलः

77

वांशकश्चयाश्रिते चन्द्रमसि नवांशकदृष्टिफलं द्विप्रकारमुक्तं शुभमशुभं च यथा आरक्षकनृपतिशु-
भमनुवधरुचिरित्यशुभम् ॥ तत्र वर्गोत्तमांशगते चंद्रे यद्दृष्टिजं फलं शुभमुक्तं तत्पुष्टमतीव शुभं भव-
ति ॥ स्वांशकगते यदशुभमुक्तं तन्मध्यमम् परनवांशकव्यवस्थिते यदशुभमुक्तं तन्नपुष्टाकं कीर्तितम् ॥
अशुभमुक्तं मेण ॥ शुभमनिष्टं यत्फलं तदुक्तमेण विपरीतं ज्ञेयमुपरनवांशकस्थस्य चन्द्रस्य यद-
शुभं दर्शनफलमुक्तं तदतीवाशुभम् स्वनवांशकस्थस्य मध्यमम् वर्गोत्तमांशकस्य लघुता एवं लग्ना-
दिस्थयोरपि दृष्टिफलं योज्यं जातके सर्वाणि फलानि भवन्तीति प्राग्भूम् ॥ यस्मादाचार्यः ॥ अ-
न्योन्यसत्वकल्पविकल्पनाभिरिदं सम्बद्धं बहुप्रमेयमभूदिति ॥ अतस्संदेहराशीदृष्टिनवांशकद-
ष्टिफलयोरपि संदेहे किं प्राबल्यमिति तत्रांशकपतौ बलवति राशीदर्शनफलं धनार्थमाह ॥ वीर्यान्वि-
त इति ॥ यस्मिन्नवांशके चंद्रव्यवस्थितः चन्द्रो लग्नो वा भवति ॥ तस्य नवांशकस्याधिपतिः स चेद्वीर्यान्वि-
तो बलवान्भवति ॥ तदा हित्वा पूर्वं प्रथमं फलं किं सर्वमेनन हि राशीक्षणस्य फलं न होरासंक्रमणं दा-
दृशाभागेक्षणस्यतं च हित्वांशे क्षणं फलमेनं ददाति ॥ अथांशकपतिर्बलवान्भवति तदा राशीक्षणं
शांशके क्षणफलं उभे पि चा एवं लग्नचन्द्रयोरुभयोरपि आदित्यस्य नवांशके क्षणमेव क्षय म त
स्मान्नाम्ना राशीक्षणफलं इत्युक्तमिति ॥ १९ ॥ इति महोत्पलविरचितायां बृहज्जातकविवृतौ दृष्टि-
फलाध्यायस्समाप्तः ॥ १९ ॥ अथ भावाध्यायो व्याख्यायते ॥ तत्रादौ लग्नगतस्य द्वितीयस्य
स्य च फलं मंदाक्रांतयाह ॥ शूरः स्तब्धो विकलनयनो निर्घृणोऽर्के तनुस्थे मेषे सस्वस्तिमिरनय-

बृ.जा.
टी.

नसिंहसंस्थे निःस्वांधः॥ नीचेंधोस्वस्थाप्राग्रहगते बुधाख्यः पतंगो भवेद्व्यो नरपहृतधनो वक्ररोगी
द्वितीये॥१॥ क्रूरः संग्रामप्रियः लब्धाक्रिरकार्यकृत विकलनयनो हीनदृष्टिः निर्घृणो निर्दयः एवं
विधोर्करवौ तनुस्थे लग्नेजातो भवति॥ एतत्तावत्सर्वलग्नेषु सामान्यफलम्॥ अथ मेषसिंहतुलवर्जितलग्ना
न्यत्तमेलग्नेतनुस्थे चार्के पूर्वोक्तं फलं न भवति॥ वदामाणं चोक्तमाणीनो प्रतिराशिफलं भवति मेषस
उच्चत्वादिमेषलग्नगतेतत्रस्थेचार्के सस्वस्मार्थोतिमिरनयनः चक्षुरोगो भवति॥ तिमिरमक्षुरोग
इतिप्रसिद्धः सिंहलग्नेतत्रस्थेर्के निशांधो भवति॥ आदित्यस्यनीचतुलः तस्मिन्लग्ने स्थेचार्केदोनेत्र
हीनः अस्वोदरिद्रश्च भवति॥ शशीगृहे कर्कटलग्नेतत्रस्थेचपतंगोचार्के बुद्बुदेत्याख्यस्फुटाक्षोभ
वति॥ मरिद्रव्यइत्यादि लग्नाद्वितीये र्के मरिद्रव्यः प्रभूतार्थः नरपहृतधनः एतद्धृतस्वः वक्ररोगी
मुखरोगी डार्तश्च भवति॥२॥ अथ लग्नात्तृतीयचतुर्थपंचमषष्ठस्थानस्य फलमेव छंदसवेनाह॥
मतिविक्रमवांस्तृतीयगेर्के विसुखः पीडितमानसश्चतुर्थे॥ असुतोधनवर्जितस्त्रिकोनेवलवांश्चशत्रु
जितश्च षष्ठयाते॥३॥ मतिविक्रमवान् बुद्धिपराक्रमयुक्तः तृतीयेर्करवौ भवति सुखः दुःखितः पीडि
तमानसः नित्योद्विग्नः एवंविधश्चतुर्थेर्केजातोभवति विसुतोपुत्रः धनवर्जितो दरिद्रः एवंविधः पंच
मेत्रिकोणस्थेरवौ भवति बलवान्प्राणी शत्रुजितो रिपुनिर्जितः एवंविधश्चार्के षष्ठयातेर्केजातोभव
ति॥ केचिद्बलवान्च रिपुः शत्रुयातेइतिपठंति॥ तथाच सत्यः॥ षष्ठेरिपुरोगशोकघ्नः॥१॥ अथ लग्ना
त्सप्तमाष्टमनवमदशमैकादशद्वादशस्थेर्के जातस्यस्वरूपं वसंततिलकेनाह॥ स्त्रीभिर्गतः परिभवं मदगो
ऽल्पजोनिधनगो विकलेक्षणश्च॥ धर्मे सुतार्थसुखभाक्सुखशौर्यभाक्चलाभे प्रभूतधनवान्पति

तसुरिःफ॥४॥ यातेर्के आदित्ये मदगे सप्तमस्थे जातः स्त्रीभिर्योषिद्भिः परिभवं गतः प्राप्तो भवति॥ निधनगे
ष्टमस्थे स्वल्पात्मजः स्वल्पापत्यः विकलेक्षणः अदृष्टचक्षुर्भवति॥ धर्मे नवमस्थे सुतार्थसुखभाक् पुत्र
धनसुखानां भागी भवति केचिद्धर्मे सुतार्थविगुत इतिपठंति॥ तथाच सत्यः॥ साध्वाचारविरोधीरुजाप्रदो दे
वपूज्ये नवमसंस्थः॥ खेदशमे सुखशौर्यभाक् सुखितो वली च भवति लाभे एकादशस्थे प्रभूतधनवा
न्बहुद्रव्यो भवति॥ रिःफे द्वादशस्थे स्वधर्मपरिभ्रष्टो भवति॥ इत्यादित्यचारः॥३॥ अथ लग्नाद्विती
यतृतीयचतुर्थपंचमषष्ठेषु चन्द्रे जातस्य स्वरूपं शार्दूलविक्रीडितेनाह॥ मूकोन्मत्तजडांधहीनवधि
रः प्रेष्यं शशांकोदये स्वर्क्षेतोच्चगतोधनी बहुसुतस्सस्वःकुटुंबी धने॥ सिंहो भागतते सुखेव मत
नये तन्मात्रभावान्वितः नैकारिर्मृदुकार्यदृष्टिमदनस्तीव्रोणलसमश्चारिगे॥४॥ मूकोवत्यादि मूकोवा
ग्हीनः उन्मत्तः धातुवैषम्यात्मथकारि जडः अप्रतिपन्नात्मांधोनेत्रहीनः हीनोऽनुचितकर्मकृत्व
धिरः श्रोत्रेन्द्रियहीनः प्रेष्यः दासः एषामन्यतमे जातः शशांके चंद्रे उदयगे लग्नगे जातो भवति एत
न्मेषवृषकर्कटवर्जमुक्तं तेषां विशेषमाह॥ स्वर्क्षे गोभ्रगते धनी॥ स्वर्क्षे कर्कटे तस्मिंल्लग्ने तत्स्थे चंद्रम
सि धनी वित्तवान्भवति॥ अजे मेषलग्नेतत्स्थे चन्द्रे बहुसुतः प्रभूतपुत्रो भवति चंद्रस्योच्चे वृषस्त
स्मिंल्लग्ने तत्स्थे चंद्रे सस्वोर्थवान्भवति॥ धनेलग्नाद्द्वितीयस्थे चन्द्रे कुटुंबी बहुकुटुंबो भवति भ्रातृगे तृ
तीयस्थानस्थे चंद्रे हिंस्रः क्रूरो भवति॥ सुखे च चतुर्थे मतनये तनये पंचमस्थाने नतच्चक्षे तन्मात्रभावान्वि
तः तेन प्रोक्तेन कार्येतनभावेनान्वितो युक्तो भवति॥ तेन सुखेसुखितः तनयेपुत्रान्वित इतिनेका

बृ.जा. टी. दिवितिनकादिः वक्रशत्रुः मृदुकायः सुकुमारशरीरः मृदुवाक्ः नातिप्रदीप्ताग्निः मृदुमदनः मेषुना ४२
शीघ्रवेगः तीक्ष्णः क्रूरस्वभावः अलसः क्रियास्वपटुः एवंविधो दिविगोलग्ने त्वष्टमस्थानस्थे च
न्द्रे जातो भवति॥५॥ अथ लग्नात्प्रमाणं नवमदशमैकादशद्वादशस्थे चंद्रे जातस्य स्वरूपं शार्दूल 80
विक्रीडितेनाह॥ ईड्यस्तीव्रमदो मदेवक्रमतिः व्याध्यर्दितश्चाष्टमे सौभाग्यात्मजमित्रबंधुजनभा
ग्धर्मस्थिते शीतगौ॥ निष्पत्तिं समुपैति धर्मधनधीशौर्ययुतश्च कर्मगे ख्यातो भावगुणान्वितो जनगते
क्षुद्रोऽङ्गहीनो व्ययेऽधमः॥६॥ ईड्यः पुरविमत्सरः तीव्रमदनोऽतिमदनः एवंविधो मदे सप्तमस्थे चन्द्रे जातो भव
ति॥ वक्रमतिः कुटिलधीः व्याध्यर्दितः रोगपीडितः एवंविधोऽष्टमस्थे चंद्रे जातो भवति॥ सौभाग्यं सर्वजन भा
नवाल्लभ्यम्॥ आत्मजः पुत्रः मित्राणि सुहृदः बांधवाः स्वजनाः धनं वित्तं येषां भागी भवति॥ शीतगौ चं
द्रे धर्मस्थिते नवमस्थानाश्रिते निष्पत्तिं समुपैति गच्छति धर्मधनधीशौर्ययुतः धर्मवित्तबुद्धिबलो
पेतः कर्मगे दशमस्थानस्थे चंद्रे जातो भवति॥ ख्यातः सर्वत्र प्रसिद्धः भावगुणान्वितः एकादशो भा
वो लाभस्थानम् तेनान्वितस्सलाभद्रव्यैः॥ एवंविधो जनिगते एकादशस्थे चंद्रे भवति॥ क्षुद्रो हिंस्र
स्वभावः अंगहीनः अवयवरहितः एवंविधोऽव्यये द्वादशस्थे चंद्रे जातो भवति॥ इति चंद्रचारः॥५॥
अथ लग्नास्थितयोर्भौमबुधयोर्जातस्य स्वरूपं वसंततिलकेनाह॥ लग्ने कुजे हततनुर्धनगे कद
र्योधर्मे सपापो दिनकरप्रतिमोन्यसंस्थः॥ विद्वद्धनि प्रवलपंडितमंत्रशास्त्रधर्मज्ञः विश्रुतगुणः परतो
ऽपि बुधे॥ लग्नस्थिते कुजे भौमे प्रहारादिना हततनुर्विहतशरीरो भवति॥ धने द्वितीयस्थे क

वीहमातो॥६॥ राशीनि चन्द्रे बोधे मिथुनस्थे कन्यानवांशकस्थे केनानिरीक्ष्यमाणे दृष्टे रंगचरामला
धिको भवति॥ भौमदृष्टे चौरस्तस्करः बुधे दृष्टे कवीन्द्रः कविराजः जीवदृष्टे मंत्री शुक्रदृष्टे गेय
ज्ञः सौरदृष्टे शिल्पिनिपुणः स्वांशेद्वित्यादि॥ स्वांशे कर्कटस्थे शशिनि सूर्यदृष्टे स्वगात्रकृशदे
हो भवति॥ भौमदृष्टे धनलुब्धः कृपणः बुधदृष्टे तपस्वी जीवदृष्टे मुख्यः प्रधानः सितदृष्टे स्त्री 81
पोष्यः स्त्रीभिरभिवर्धनीयः सौरदृष्टे कृत्यनिरतः कार्यसक्तः॥६॥ अथ सिंहधन्विमीनस्थे चंद्रे
सूर्यादिदृष्टे फलं प्रहर्षिणयाह॥ सक्रोधो नरपतिसम्मतो निधीशः सिंहांशे प्रभुरसुतोऽतिहिंस्रक
सिंहार्कदृष्टे सक्रोधः क्रोधयुक्तो भवति भौमदृष्टे नरपतिसम्मतः राजवल्लभः॥७॥ सिंहांशकस्थे
चन्द्रमसि अर्कदृष्टे सक्रोधः क्रोधयुक्तो भवति भौमदृष्टे नरपतिसम्मतः राजवल्लभः बुधदृष्टे नि
धीशः निधनानि धनशाः प्रार्थ्यः बृहस्पतिदृष्टे प्रभुः शुक्रदृष्टे असुतः अपुत्रः सौरदृष्टे अतिहिंस्र
कर्मा क्रूरकर्मा जीवेंशेत्यादि जीवांशे धनवांशे गते मीननवांशके गते वा चन्द्रे सूर्यदृष्टे प्रख्यातब
लः प्रख्यातवीरो योधो भवति॥ भौमदृष्टे रणोपदेष्टा संग्रामदेशकालव्यूहरचनाविभागज्ञः बुध
दृष्टे हास्यज्ञः जीवदृष्टे सचिवो मंत्री शुक्रदृष्टे विकामः कामहीनः सौरदृष्टे वक्रशीलो धर्मम
तिरिति॥७॥ अथ मकरनवांशकस्थे कुम्भनवांशकस्थे वा चंद्रमसि सूर्यादिदृष्टे फलं शालि

द्वि

२ · ज्यो · टी · न्याह॥ अल्पायत्वोदुःखितस्सत्यपिस्वेमानासत्कर्मणिस्थिरनुरन्नः॥ध पुरुषोकृपणश्चार्किभागे ३६

चन्द्रेमान्नौतदृष्टिर्विदिष्टा॥८॥ आर्किभागे मकरनवांशकस्थे कुंभनवांशस्थे वा चंद्रमसि सूर्यदृष्टे ख्

त्वापत्यः अल्पपुत्रसवो भवति॥ भौमदृष्टे सत्यपि विद्यमाने धने दुःखितो भवति बुधदृष्टे मानस

त्रो गर्वितः जीवदृष्टे आत्मीयकर्मणि अनुरक्तः कुलानुरूपकर्मकृत्॥ शुक्रदृष्टे दृष्टासुखोऽपि

गम्यास्त्रिष्टोवल्लभः सौरदृष्टे कृपणः॥ अदानात्तत्र कालनवांशकपाकृदृष्ट्यालग्नेपिचन्द्रे द्वि

व्यम्॥ किंतु तत्रापि कर्कटकनवांशकं विनाचन्द्रदृष्टिरत्रमेति॥ भानोतदृदं दृष्टे भानावादित्येन

न्द्रादिदृष्टे चन्द्रेर्दिग्गेहे दृष्टितदृत्तेनैव प्रकारेण दृष्टिफलम्॥ यत्र तत्र राशौ यत्र तत्र नवांशके स्थि

चंद्रमस्यर्कादिदृष्टे यत्फलमुक्तम्॥ तत्रस्मिन्नवांशकेस्थस्य च स्थिते कर्केचंद्रादिदृष्टे तदेव फलं वा

च्यममवति॥ नवांशकस्थितस्यादित्यस्यचन्द्रस्य च तमाग्रहदृष्टिफलं तुल्यं वितु यदादित्यदृष्ट्या

चन्द्रस्योक्तमत्र चन्द्रदृष्ट्या सूर्यस्य वक्तव्यम्॥ तद्यथा॥ मेषवृश्चिकनवांशस्थे चंद्रदृष्टे

आरक्षकोभवति॥ वृषतुलनवांशकस्थे मूर्खः मिथुनकन्यानवांशके रंगचरः सिंहनवांशके स्थि

सक्रोधः॥ धन्वीमीननवांशकस्थे पुष्टितबलः मकरकुंभनवांशकस्थे स्वल्पपत्यः कर्कटनवांशस्थे

त्यगात्रारतिएवमादित्यस्य नवांशकास्थितस्य ग्रहदृष्ट्याचंद्रेण फलं मानामिति॥९॥ अथास्येव नवांश

कदृष्टिफलस्य विशेषमाह॥ वर्गोत्तमस्वपरगेषु शुभं यदुक्तं तत्पुष्टमध्यलघुताशुभ

मुक्तमेण॥ वीर्यान्वितस्याकपतिस्त्रिरुणं हि पूर्णं स्थाणीत्येण स्वफलं मशाफलं ददाति॥१०॥ न

गरूज वीर्यादियुतानान्येषां नान्येषां वीर्यान्वितः अतन्न कर्कटवर्जमन्योलग्नः चंद्रदृष्टो हीनवलो भव

ति हीनवलत्वादशोभनफलः॥ तथा च वंकालकाचार्यः॥ सोप्याचंद्रमवनं लग्नमाश्रमिसि

रविरसंदिदृम॥ अस्तु हक फंदिदं अणस हणायस्तु समरेमु॥११॥ अधुना होराद्रेष्काणस्य

न स्थितस्य ग्रहदृष्टिफलं शार्दूलविक्रीडितेनाह॥ होरेशार्धदलाश्रितैः शुभकरो दृष्टः स्त्रणीतरु

तःन्यंशोतत्पतिभिस्सुहृद्भवनगैर्वावीक्षितःप्रस्यते॥ यत्प्रोक्तं प्रतिराशिवीक्षणफलं तन्द्वादशांशे

शेस्मृतं सर्याद्येरवलोकितेशशिनित्येषंशोस्थितः॥१४॥ होराशब्देन राश्यर्धमुच्यते होरेति लग्न

भवनस्यार्धमितिवचनात्॥ होरायाः ईशाः तस्यार्धदले होरेशार्धदलं तत्राश्रिताः होरेशार्धद

लाश्रिताः तैर्ग्रहैः स्त्रणीचन्द्रः तद्गतःतद्धोरास्थः दृष्टः शुभकरो भवति एतदुक्तं भवति॥ यत्र

यत्र राशौ होरायां यस्यां चन्द्रः स्थितः तदधोरास्थैः सर्वैर्ग्रहैर्यदि दृश्यते तदा जन्मानि शुभक

रो भवति॥ तेनार्कहोरास्थः चंद्रः यत्र तत्र राश्याश्रितैः अर्कहोरास्थैर्ग्रहैः दृष्टः शुभकरो भव

ति॥ अथैव चन्द्रहोरास्थैर्दृष्टः अशुभफलः॥ एवं यत्र तत्र राशौ स्वहोरास्थश्चन्द्रः चन्द्रहो

रास्थैः ग्रहैर्दृश्यते यदा तदाशुभकरो भवति॥ अथार्कवादित्यहोरास्थैः दृष्टः अशुभफलः ए

वं लग्नेपि होरावशेन फलं योज्यम्॥ त्र्यंशे तत्पतिभिरिति यत्र तत्र राशौ यस्मिन्स्त्र्यंशे द्रेष्काणे चन्द्रमा

व्यवस्थितस्तस्य द्रेष्काणस्याधिपतिस्तेन दृष्टः चन्द्रमाः शुभकरो भवति॥ शुभकरो भवति यस्मा

देनेव सत्पजातके उत्तमः॥ देशाधिपसदृष्टेः पात्रानित्य फलम् दृष्टिरिति धनवान्॥ द्रेष्काणाधि

पतिभिरिति वहुवचननिर्देशात्नवांशकवादशभागत्रिंशांशकाधिपतयोग्राह्यंते॥ तैरपि दृष्टश्चन्द्रः र

मसिस्थिते यदुक्तं तदेव वाच्यम् इति। चन्द्रे भपबुधावित्यादि यदुक्तं एवं लग्नेपि गतत्रापि कर्कटाद्यंशा विनांशे पूर्व ४९

बृ॰ जा॰ टी॰ कं यैर्वा प्रायस्सौम्यैः शुभैर्नान्यैरिति॥ सुहृद्भवनैरित्यादि॥ मित्रक्षेत्रस्थैर्ग्रहैर्दृष्टश्चन्द्रः शुभस्तस्य
यते शुभकर एव॥ अथ यदि स्वस्वभवनगैर्दृष्टश्शुभस्तस्य शुभकर एव॥ अथ यदि स्वस्वभवनगैर्दृष्टेन 84
शास्यते॥ एवं लग्नेपि योज्यम्॥ यत्प्रोक्तमित्यादि सनिराशौ मेषादिस्थे चन्द्रे दृष्टिस्तशोभना सैव नैसा
दि॥ अतोस्मात्परं शशिनि चन्द्रे सूर्यादिग्रहैः कैदिभिरवलोकिते दृष्टे नवांशेषु स्थितं फलं तदेवं ज्ञातव्य
मिति॥ ८॥ अथ मेषवृश्चिकवत्सलानवांशकस्थे चन्द्रे अर्कादिदृष्टे फलं वसंततिलकेना
ह॥ आरक्षकोवधरुचिः कुशलोनियुद्धे भूपोर्थवान्कलहकृत्क्षितिजांशसंस्थे॥ मूर्खोन्यदाररत
काव्यविदस्सितांशे सत्काव्यकृत्सुखपरोन्यकलत्रगश्च॥ ५॥ क्षितिजः भौमः तस्य नवांशकस्थे
मेषनवांशकस्थे वृश्चिकनवांशकस्थे चन्द्रे सूर्यदृष्टे आरक्षकोनरगरक्षाधिकृतः भौमेन
दृष्टे वधरुचिः हिंसने रुचिः बुधेन दृष्टे कुशलो नियुद्धे बाहुयुद्धे कुशलः। जीवदृष्टे भूपो राजा शुक्रदृष्टे धनी अर्थवान् शौ
रदृष्टे कलहकृदिति मूर्खः इत्यादि॥ सितांशे शुक्रनवांशे वृषनवांशके तुलनवांशके वा चन्द्र
अर्कदृष्टे मूर्खो भवति॥ भौमदृष्टे अन्यदाररतः परदारसक्तः॥ बुधदृष्टे काव्यकृत्काव्यज्ञः जीवदृष्टे स
त्कविः शुक्रदृष्टे सुखपरः सौरदृष्टे अन्यकलत्रगः परदारगामी॥ ५॥ अथ मिथुनकन्याकर्कटनवां
शकस्थे चन्द्रे अर्कादिदृष्टे फलं वसंततिलकेनाह॥ बौधे हि रंगचरचौरकवीन्द्रमंत्रिगेयज्ञशिल्पि
[illegible] ॥ स्वांशेल्पगात्रधनलुब्धतपस्विमुख्यस्त्रीपोष्यकृत्यनिरताश्च निरीक्षिताश्च ॥

दृष्टे तत्र नायः रविदृष्टे धनोदरिद्रः॥ एवं मिथुनलग्नेपि॥ स्वर्क्षे कर्कटस्थे चन्द्रमसि भौमदृष्टे योधो भ
वति। बुधे कुशलः बुधदृष्टे कविः जीवदृष्टे सः पंडितः शुक्रदृष्टे भूमिपातीजज सौरदृष्टे योजीवी प
शोपजीवी। सूर्यदृष्टे दुगिनोगी च दुर्व्याधि मर्दितः एवं कर्कटलग्नेपि॥ १॥ अथ पञ्च सिंहकन्यातुलावृश्चि
कस्थे चन्द्रे बुधादिदृष्टे जातस्य स्वरूपं शार्दूलविक्रीडितेनाह॥ ज्योतिर्ज्ञाढ्यनरेन्द्रनापितनपक्षे
६ शादुधाद्ये हरौ तंदूपचमूपनैपुणयुता दृष्टे शुभैः स्वाश्रया॥ जूके भूपसुवर्णकारवणिजश्लेषे
क्षितेनैकृतीकीटयुग्मपितानतश्च रजकोव्यङ्गोधनोभूपतिः॥ २॥ बुधोदयो बुधजीवशुक्रसौरार्कभौमाः
हरिस्सिंहः तस्मिन् हरौ सिंहस्थे चन्द्रे बुधदृष्टे ज्योतिर्ज्ञः ज्योतिषगणशास्त्रवेत्ता॥ जीवदृष्टे आढ्यः ई
श्वरः शुक्रदृष्टे नरेन्द्रो राजा सौरदृष्टे नापितः रविदृष्टे नृपो राजा भौमदृष्टे क्ष्मेशः पृथ्व्यादिपतिः
। एवं सिंहलग्नेपीति तद्वदित्यादि तद्बुधदृष्टे इत्यादि वर्तते सर्वत्र॥ षष्ठे कन्यागते चन्द्रमसि बुधदृ
ष्टे भूपो राजा भवति॥ जीवदृष्टे च मूपस्सेनापतिः शुक्रदृष्टे पुरुषे नैपुणयुतः सर्वकार्येषु शुभैस्स
दृष्टेः अशुभैस्सौररविभौमैर्दृष्टे स्वाश्रयो भवति। स्त्रियमाश्रित्य जीवतीत्यर्थः॥ एवं कन्यालग्ने
पि॥ जूके तुलस्थे चन्द्रमसि बुधदृष्टे भूपो राजा भवति॥ जीवदृष्टे सुवर्णकारः शुक्रदृष्टे वणिक् शे
षाश्शनिभौमरवयः एषामन्यतमेन दृष्टे नैकृतीउग्रकर्मा भवतीत्यर्थः एवं तुललग्नेपि। कीटेवृ
श्चिकस्थे चन्द्रमसि बुधदृष्टे युग्मपिता द्विपितृकः द्वयोः पितेत्यर्थः। जीवदृष्टेनतः प्रह्वः शुक्र

85

ब॰ जा॰ टी॰

दृष्टे रजकोवस्त्ररागकृत् सौरदृष्टे व्यंगो हीनः रविदृष्टे धनी दयार्द्रः भौमदृष्टे भूमिपतिःरा
जा एवं वृश्चिकलग्नेपि ॥ २ ॥ अथ धन्विमकरकुंभमीनस्थे चंद्रमसि बुधादिदृष्टे जातस्य स्व
रूपं शार्दूलविक्रीडितेनाह ॥ ज्ञात्युर्वीशजनाश्रयश्च तुरगे पार्थेश्वसद्भाषकः सलक्षीशानसंस्थ 86
पंडितधनी दृश्योनभूपोन्यगो ॥ भूपोभूपसमोन्यदाररनितः शेषैश्च कुम्भस्थिते हास्योन्नृपाते
कुंभस्थे [illegible] पापश्च पापे दिते ॥ ३ ॥ तुरगोधन्वी तत्रस्थे चंद्रमसि बुधदृष्टे ज्ञातिमाः स्वजनभ
र्ता जीवदृष्टे उर्वीशो राजा शुक्रदृष्टे जनाश्रयः । जनानां स्थानम् पापैश्च शनिरविभौमैर्दृष्टे सदं
भादांभिकाः शठः परकार्यविमुखा भवंति ॥ एवं धनविलग्नेपि । मृगो मकरे तत्रस्थे चंद्रमसि
बुधदृष्टे क्ष्मालक्षीशः राजाधिराजः जीवदृष्टे नरेंद्रो राजा शुक्रदृष्टे पंडितः सौरदृष्टे धनीवि
त्तवान् सूर्यदृष्टे दृश्योनः दरिद्रः भौमदृष्टे भूपो राजा । एवं मकरलग्नेपि । कुंभस्थे चंद्रमसि बु
धदृष्टे भूपो राजा भवति जीवदृष्टे भूपसमो राजतुल्यः शुक्रदृष्टे न्यदारविरतः परस्त्रीनि
रतः सत्तुकृत्यर्थः । शेषैश्च शनिरविभौमैः चक्राख्यात्परदाररतः एवं एवं कुंभलग्नेपि ॥ झषो मी
नलग्नगते चंद्रमसि बुधदृष्टे न्हास्यरतः परिहासविचक्षणो भवति जीवदृष्टे नृपती राजा
शुक्रदृष्टे बुधः पंडितः पापास्सौरार्कभौमाः तैर्दृष्टे पापश्च पापकृत्पापएव भवति ॥ एवं मीनल
[illegible]

त्मानं समवाप्नोति मन्त्रं विलेशायाद्वानयाश्चवेधानवाद्यापि धनं दशामूले मेत्तनुनासिकापुवेदीर्घव 87
क्रेकरचरणः ध्यात्मकोमगास्याभीरुश्च पलोश्च वंधनभाक् ... कुटुंबोल्पधनस्तूपणश्च न्यापुजो
रतस्वजनः सुजनसम त्यौपर्क स्यपादरणोश्च लब्धधनः उपवासव्रतशीलोनीचाभिष्टमवाप्नुया
त्प्रार्यासू बहुविग्रहोल्पकेशोदुर्बलजानुर्भोगानतः व्यालादनलाच्चस्त्रीन्पाद्धधात्प्रपतनात्भजा
द्वाल पित्तोद्यादजीर्णान्स्यपतेवामार्गविभूषः मलिनः काद्यशेविलंमेश्च दुः कुरः कुलागतः उरु
नः पितानिलभूपिपच्छत्तिलप्यसमानवासश्च प्राज्ञान्ताप्रायते धीन्नुवकु भत्यस्साध्यते व्ययेश्चा
पि क्षीणः स्वगोत्रगुरुजनपरमवस्तु हृत्स्वजनशत्रुः कर्मणि पापेस [illegible] कोलानवाप्नुयात्स्त्री
मात्धर्मध्वजपूर्व नोदेवतपूजां चकार यतिभायात् विग्रहशीलोलभेतेविविधान्नोगान्कपोद्भवा
नुरसिमुपमेजठररोगाद्भमणान्स्त्रीणाम्प्रयोगाकुले द्वादशमे प्राग्लग्ने स्थूलो यो मीद्दं ममाद्यः
नासः कफवातकीमतात्मात्वदोषीनेकमतिवेषः क्लि मायव्ययमत्यस्वजनस्त्रीयजिस्सहजना
र्थः कर्मणि धर्मेषु मित्रोपचयस्वदारश्चनीचाचारो भार्मीलभतेवसितूनसुदारः ॥ ण्यानृ
तान्रोगान्स्त्रीणांनानागुप्तपाद्भवं व्यालीश्च सिंहेभ्यः म्लंछुरुवेर्गणा वेदसेविते गुरुवेषि
कारैश्च विधैषध प्रयोगादुपवासान्मार्गदोषाद्दामीलं एवं षष्ठ्यादौ प्रोरसमा गमेराश्यादौ ॥
तेफल तंलग्नजातकस्योक्तं एवं चैव्यमानां फलं दृष्टिफलं लग्नजातकस्यवक्तव्यम् किंतु ल
ग्नपमधिकं परत्रेति भावाल्वन्वादयः भवनगुणानाशित्रुलोः शाप्तीश्च रगुणेश्च चिंतनीयाः एत

दुक्तं भवति लग्ने चिलस्व तिलग्नपती च बलवति जातस्य शरीरसुखं धृविर्ब क्ष्या लग्नाद्द्वितीयराशौ बल
वति तदधिपतौ च बलवति जातस्य धनवृद्धिर्वक्तव्या भवनभनाय योऽस्माद्यगुणौ बलवत्तमं तनुधनाद
यो ये लग्नाद्याः स्थिराशौ च बलहीने तदधिपतौ च बलहीने जातस्य तस्य भावस्य हानिर्वक्तव्या भ
नभनाय योर्यद्येकोऽबलवान्भवति तदा मध्यस्या भाववृद्धिर्वाच्येति ॥ ४७ ॥ इति भट्टोत्पलविरचितायां
बृहज्जातकविवृत्तौ राशिशीलाध्यायः षोडशः ॥ १६ ॥ अंथातो दृष्टिफलाध्यायो व्याख्यायते ॥ तत्र मेषवृ
षकर्कटस्थे चंद्रे भौमाद्यैर्ग्रहैर्दृश्यमाने जातस्य स्वरूपमानं शार्दूलविक्रीडितेनाह ॥ चन्द्रे भूपबुधौ नृपो
पमगुणी स्तेनो भनाश्चाजगो निःस्वः स्तेन नृपा व्यभूपधनितः प्रेष्या कुजाद्यैर्रविः ॥ नःस्थेयो व्यवहार
पार्थिवबुधाभीस्तं तवा यो धनस्वर्दर्ययोधक विद्भूमिपतयो योजीविद्धृप्राणिणः ॥ १ ॥ कुजाद्याः भौमाद
याः भौमबुधजीवशुक्रसौराः ॥ तत्र मेषस्थे चंद्रमसि भौमदृष्टे जातो भूपो भवति बुधेन दृष्टः पंडितः
जीवेन नृपोपमः शुक्रेणोग्रगुणिगुणवान् सौरेण स्तेनश्चोरः स्यमेनो धनो दरिद्रः इति एवमजे मेष
लग्ने भौमादिदृष्टे फलं वाच्यम् ॥ निःस्वस्तेन इति गविवृषस्थे चंद्रमसि भौमदृष्टे जातो निःस्वो
भवति बुधदृष्टे स्तेनश्चोरः जीवदृष्टे नृपदृव्या द्यः नृपा द्यः ईश्वरः शुक्रदृष्टे भूपो राजा सौ
रदृष्टे धनवान् सूर्यदृष्टे प्रेष्यो दासः ॥ एवं वृषलग्नेपि ॥ नःस्थे मिथुनस्थे चंद्रे भौमदृष्टे योध्यवहा
रोपजीवी कर्मकः बुधदृष्टे पार्थिवो राजा जीवदृष्टे बुधः पंडितः शुक्रदृष्टे अभीभय रहितः सौर

दृष्टे दृष्टे स्याभेर्जले वीभूतेनाप्य टननिरशोऽपि च ऋक्षे तद्वदेवाबलान्वितैर्ग्रहैमपाति
बलं पूर्वविलग्ने मिथुने हीनांगस्वरूपते धिकं गोवा प्रियवाग्विशिष्ट कर्मा मिश्रप्रकृतिर्द्विजन
नीकः अल्पमति रल्पकायः सतां च सहितो गुरूणां च अस्वसहितोऽस्य चेष्टः परार्थ मंदीगुणपु
तः कर्मसु बहुव्ययमिरतो धुर्मसाधपतिवाप्यधर्मिणः शंफुल्लाभान्विविधान्दोषैः ते स्तेनाप्रा
ति बहूनः पतोलमतेगां च पुत्रादारूणं जयति मिलं कर्कस्य राशौ लग्ने नैकामोगुरुरोगगां
भीरुः उरसि कृताभिज्ञान स्कपानिलान्मादृष्ट्या ही पापान हितान्भजते परस्वमपि निद्दिपेद्यः
येन सकृत्स्वजनाद्धस्वजनैर्विभर्त्सितो हृष्टः स्थिरप्रभवः तीव्रणं कर्मविशान्तिस्यं धर्मापतः
परस्वामी शूसद्भादारोरिपुनिर्जितः शत्रुपूज्यस्समोहानाम् कंठत्वाद्रुजवाचाकफोदयादति
भजनाद्ददात् दद्याद्वा दद्यवाजलोदरान्मस्तुमायाति कंलं सिंहविलग्ने कठिनः प्रियामि
षः पोत्तितो वित्तनासः बहारंभकुटुंबपूर्णस्वपरस्मन्मतः ख्यातः सहजविस्वादीसुज
नस्य घातकोविक्रमे स्सबै पुत्रः अविषादी कर्मकरो विविधोपचयोस्वधर्मिष्टः भार्यावि
दुलभतेव चाविविधाकुलै रूपतास्म कन्या रूजश्चवक्षोजान्वीरं सेतु न्वाप्नोति मस्तुःप्रा
स्ते पापोर्विद्वेषका काष्ठैरप्यामयेर्वापि अंपुचरैर्वीसल्लैर्वुभुक्तयाहा समुपैति सिंहे वणविलः

वृं·जा·
टी·

मेनोपि प्रबलकुष्ठविदीर्घचरणकरः। मिश्रप्रकृतिश्चार्याकृतिस्तिर्यग्योनिचार्थवान्कृपणः स्व
तजन्म स्थितात्वन्या पत्रोभ्रातृभिः विरुद्धश्चाधर्मप्रियोल्पलाभ ष्कर्मणि निपुणस्समाचरति प
त्नी नित्यविरुद्धा लभते मातुश्च गर्हितान्नरवीन् अनिलोद्भवांश्च रोगांश्च महान्पीडाश्च मृतुः स्यः
विविधाश्च तुष्पदगणाद्वस्याग्नितोडवाद्रोगात् शोकात्संतापं च संप्राप्नोति पापाद्वार्ककलस
प्रभवराशौ लग्ने विषमांगस्सूयते विषमशीलः कफवातिकः सुचपलो ह्रस्वग्रीवः कृतज्ञश्च ग्रंथी 90
न्विपुलं लभते व्ययश्च सत्पुष्यति यश्चाः प्राप्य गुरुसेवायां निरतः पितान्यजातानां सहजपूज्यः पु
त्रधनविधर्मिष्ठो विना श्रमायाति पीडिते सर्वे: सैवः त्यक्तभार्या कलहमार्चिवं उल्लेशादिभिश्चि
ष्टः मत्तुः स्यातानुरूपात्स्वजनात्सौष्याश्च तुष्पदाघापि स्वपक्षविप्रयोगात्प्रवासान् मार्ग
योगाद्वानलं श्रष्टमराशौ लग्ने विशालवल्लाननोदरः क्रूरः पित्तः प्रकृतिः पिंगुलस्णाम्रदुर्द्वत
गतिः परस्वामी स्फीतनकुटुंब स्वजनीतको नन्त्र बहुदृष्यो बहुप्रसवः सुखरहितो श्मात्म्योनपसे
वी धर्महीनश्च भार्यानिमित्ते सुखी शत्रुरगर्याद्दातिबहुश्चापन्न स्वकुलोद्भूतां प्रात्रं लभते रोगांश्चा
नेकविविधान् गात्रछिद्रे प्रकृत्योर्वक्राणातो बंधनैप्रहारैश्च रोगे बाधा यकृते र्ज्वलनाच्च मृत्यु ।
माप्नोति वर्कलस्य स्थूलोष्ठ दशन नासो नवमे लग्ने कफानलप्रकृतिः मांसलशुष्कहीन भुज स्कुलस्वी
क मनीषि स्य परः धर्मितमध्यमगतिः दारैश्च विरोध मायाति रोगान्वदनेलभते चतुष्पदाश्च

पुत्रेश्चा ४॥ पाबन्धौ स्वरा म्यानस्त्री सुहृष्टो बलभः नवत्वविभवः गणपुरबलग्रामपूज्यः गणानां सन्
हानां पुराणां वेलीनां सैन्यानां ग्रामाणां च वरिष्ठो मान्यः अर्थवान्सधनः एवंविधस्स्वान्सीय स्व
राशौ तुलस्थे सौरे जातो भवति अस्वः दरिद्रः विकलदर्शनः स्वल्पदृष्टिमात्रहीनः जननीविमुक्तः तः
असुः पुत्ररहितः क्रूरः मूर्खः एवंविध … स्थे सौरे जातो भवति अनार्यः मूर्खः विस्तुरेवा
दुःखितः वितनयः पुत्ररहितः विष्टिकृत्परवाहः एवंविधः स्वपुत्रे सिंहस्थिते जातो भवति ॥५॥
अथ धन्विमीनमकरकुंभस्थे सौरे जातस्य स्वस्वं शार्दूलविक्रीडितेनाह स्वंतः प्रत्ययतो नरेन्द्र।
भवने सत्पुत्रजायाधनो जीवक्षेत्रगते च जिपुरबलग्रामाग्रनेता पदा अन्यस्त्रीधनसंवृतः पुरब
लग्रामाग्रणी मंदहक्कुत्सिते हेमलिनः स्थिरार्थविभवो भोक्ता च जातः पुमान् ॥४६॥ शोभनोन्नः प्र
र्यतो यस्य स्वतत्तेम्भ कर्मणा तस्य मत्स्यभवियतीत्यर्थः अत्यंतशोभनं सौख्यादिकं यस्य न
रेन्द्रभवने राजगृहे प्रत्ययितः संजातप्रत्ययः सत्पुत्रजायाधनः शोभनभार्यः सत्पुत्रः सद्धनः सहितः
पुरबलग्रामाग्रनेता पुराणां नगराणां बलस्य सेनायाः ग्रामाणां चाग्रनेता प्रधाननायकः 91
अथवा भवति एवंविधो कुजे सौरे जीवक्षेत्रगते धन्विमीनस्थे जातो भवति अन्यस्त्रीधनसंवृतः
परयोषिद्भिः परवित्तेश्च संवृतस्संयुक्तः पुरबलग्रामाग्रणी प्रधाननायकः मंदहक् अल्प
चक्षुः मलिनो मलोपेतः स्नानालसः स्थिरार्थः स्थिरवित्तः स्थिरविभवः स्थिते प्रार्थः भो
क्ता अर्थसंचयशीलः एवंविधः पुमान् पुरुषः स्वहेते मकरकुंभस्थे सौरे जातो भवति शनैश्च

र॰ मृ॰ रसाग्निस्वभावः॥४६॥तेषु सर्वेषु ग्रहराशीस्वभावे षवलं बतिराशीतदधिपतीवतस्मिन्
हेवलवतिजातस्य यथोक्तं राशीस्वरूपं भवति ग्रहकयोश्चवलवतोर्मध्यमध्यमानमितिन
कस्मिंश्चिद्वलवति नकिंचिदिति अथमेषादिषु लग्नेषु जातस्य चंद्रकांतराषुस्वरूप
पतिदिष्टं उच्यितागपाह ग्राशीरकसमागमे दशानां सदृशा फलप्रवदंतिलग्नजातम फल
मधिकमिदं यदन्नभावाभवनभनाथ्युतो विनुनी या॥४७॥ ग्राशीरकरश्मच्छ्रमाः तस्यराशी
भिस्सह समागमे योगे यत्स्वरूपमुक्तं दशानामग्रधपी त्याद्यितं मेषलग्नजातस्यापि वक्तव्यम
एवमन्येष्वपि राशीषु वृषादिषु स्थितेचं द्रमसियदुक्तं तल्लग्नजातस्यापि वक्तव्यम पतान
नयर्स्वदृशाफलं वदाम्नि स्वरूपमेदाभावात् तथा चमत्यः मेषलग्ने कुनखीसरोषगोमेदकूलव
लितवावपः पितानिलमृपिप्रह्रपणाति चउच्य यज्ञेव रहितोवाल्पगुरुनिः मंदस्तुतः स्वजन
सहजहितकर्ता धर्मयुक्तो विदेशोपगत आकर्मारम्भफलम् नीचांवाविषलांवा पिशुनांचल
तेऽन्य पूर्विकां भार्याम् सहजसमान्य पितिमित्राणि चास्यवंधुत्वमायांति शास्त्रेण विधेर्वा मरणं
पितोऽन्वैविंकारैर्वस्वातसज्जोलनाद्वावंधत्वाद्दुर्गात्प्रयतनाद्वा मेलं वृषभाविलग्ने जातोपि
गंडनामीमहालिलाटश्च श्लेष्मानिलमपित्तरूपागीवऊरोव्ययरत श्च कन्याप्रजोपत्र:
पितुर्जनन्याप्रजोल्पपुत्रः पितुर्जनन्याश्चहोषकृद्रुपाः कर्मगणसततं सक्तो विधर्मप्रवृत्तोर्थ
भाक्चैव मित्रकलहकांक्षो शास्त्रविघाती सदासुजनहंती मरणं प्राप्नैः यायोमरगोश्चलमतेन्य
स्पेनीचकुलानेता धर्मकर्मकृतश्रस्यावेन्नः श्लोकार्थः सुखीभोगवान् एवं विधोमकरस्थजीवेजातो
भवति बृहस्पतिराशीस्वभावः॥४९॥ अथ मेषवृश्चिकवत्तलस्थेशुक्रे जतस्य स्वरूपं उच्यतामा
याह परयुवतिरतस्तदर्थवादैर्हृतविभवः कुलपांसलः कुजर्क्षे स्ववलमतिधनोनरेन्द्र पूज्यः स्व
जनविभुः प्रथितोभयः स्मितेस्वा॥५१॥ परयुवतिरतः परस्त्रीषुसक्तः तदर्थवादैः तासांस्त्रीणामर्थ
वादैरपराधानुवचनैः हृतविभवः अपहृताद्यः कुलपांसलः कुलकलंकभूतः एवंविधः सितेशु
क्रेकुजर्क्षेमेषवृश्चिकस्थे जातो भवति स्ववलेनात्मीयवीर्येणास्वमत्याचस्वाचधनंयस्यासेस्ववं
लब्धेतिधनः राजपूज्योराजवल्लभः स्वजनविभुः वंधुप्रधानः प्रथितः प्रख्यातः अभयोनिर्भयः ए
वंविधस्वेस्वर्क्षेवृषतुलस्थेशुक्रे जातोभवति॥५२॥ अथ मिथुनकन्यामकरकुंभस्थे शुक्रे जा
तस्यस्वरूपं उच्यतामाहायन् पकृत्यकरोर्थवान्कालात्वविन्नि धने वध्यगते तिनीचकर्मा रवि
जर्क्षेगतेसुराषिपूज्यसुभगस्त्रीविजितोरतः कुनार्याम्॥५३॥ नृपकृत्यकरो राजकार्यकर्ता अ
र्थवान्धनीकलाविलकलाज्ञः एवंविधः सुराषिपूज्येदेवगुरौ शुक्रेमिथुनस्थे जातो भवति षष्ठ
गतेकन्यास्थे शुक्रेतिनीचकर्मानिकृष्टकार्यकरो जातो भवति सभगस्सर्वजनप्रियः स्त्रीविजितः
प्रमदावशगः कुनार्यांकुत्सितस्त्रियायांरक्तः एवंविधः शुक्रे रविजर्क्षेगतेप्राने श्वरदेवस्थे
मकरस्थे कुंभस्थे जातो भवति॥५४॥ अथ कर्कटसिंहधन्विमीनस्थे शुक्रे जातस्य स्वरूपं प्र
स्वरिपुरह द्विभार्यार्थीभीरुः प्रचरमदशोकश्च प्राप्याभिमहर्योयाप्राप्य प्रचरयुवतिमंदत

बृ.जा.
टी.

३३

नव: गणी: पूज्यस्तस्य तुरगसहितो दानवगुरौ झषे विघनाढ्यो नृपजनितपूजोतिसुभग:॥४७॥धि
स्त्रीक: अर्थी याच्ञापर: भीरुस्सभय: प्रवरमदशोक: अतिदर्प: अतिदु:खित: एवंविधो दानवगुरौ
शाग्धि मेषकर्कटस्थे जातो भवति बालाप्राज्ञ: स्त्रीप्राप्तधन: प्रवरयुवति: प्रधानभार्या: मंदतनय: स्व
ल्पापत्या: एवंविधो हिमांशौ सिंहस्थे कुजे जातो भवति गतो हीन्दे: पूज्य: ते स्सत्कृतो मान्य: स स्व
स्वधन: एवं तु रणाश्रिते धन्विन गतेजातो भवति विद्वान्पंडित: आढ्य ईश्वर: नृपजनितपूज: न
येण राज्ञा जनितोत्पादिता पूजार्चना यस्य अतिसुभग: सर्वजनानामतिवल्लभ: एवंविधो मंदेमी 94
नस्थे कुजे जातो भवति कुजे राशीश्वभाव:॥४९॥ अथ मेषवृश्चिकयोर्मिथुनकन्यागते सौरे।
जातस्य स्वरूपं वसंततिलकेनाह। भूर्जाट नष्ट पट वान्विसुहृद्धमेजेकीटे तुवंधवधमस्माकूच
पलाश वर्णश्शानिर्दुःस्त्रीपरितनयस्खलितश्चलेस्थ्यरक्षापतेभवतिमुख्यपतिश्चवैधे॥५०॥मू
र्खो ज्ञानापेत: अटन: परिभ्रमणशील: कपटवान्दांभिक: विसुहृन्मित्ररहित: एवंविधो यमे
सोमे भौमे मेषस्थे जातो भवति वंधवधमाकूव धनाउनमूवंधोवंधनमूवधवंधनेभजतेगुह्मेचताड्य
ते च पलाश्रितपास्वनवस्थित: अघ्रणो निर्दय: एवंविध: कीटे वृश्चिकस्थे सो जातो भवति निर्दुःस्त्री
परितनय: निर्गला हृीलज्जा यस्याने लज्ज: निस्त्वस्व: दु:खित: निर्धनो दारिद्र: निस्तनय: पुत्ररहित:
लेखे आलिख्यकर्मणि स्खलित: अन: रक्षापति: आरक्षक: मुख्यपति: प्रधाननायक: एवंविधो वो
धे बुधर्क्षे इत्येवमिथुनकन्यास्थे सोरे जातो भवति॥५१॥ अथ धव चतुल कर्कट सिंहस्थे सोरे जातस्य स्व
रूपं ददर्शतथाह वर्ज्यास्त्री ष्टेनवरूभवोऽर्भार्यो वधस्थेरक्ष्यात स्त्रवश्चिगणपुरबलग्राम पूज्यो
केवांबश्चाकार्वियसोविकलदृग्धनोनात्यहोमो सुलौक्ष: सिंहेना क्री बिसुखतनयोविश्चि कृत्स्र

तास्वभिलाषीसु परिभव: अल्प वर्त्मपरैरभिभूत: एवंविधो शेत्रे धर्के राशौ गोसिंहस्थे जातो भवति त्यागी
दाता स: पंडित: प्रचरगुण: प्रभूतगुणयुक्त: गुण शौर्यादय: सुखीभोगवान् क्षमी सहिष्णु: युक्तिस: प्रयो
गवेत्ता विगतभय: एवंविधस्य गणराशौ कन्याराशौ वुधे जातो भवति॥३२॥ अथ मकरकुंभधन्विमीनगते वु(
धे जातस्य स्वरूपैउपमंद्रस्केनाह। परकर्मकृदस्वशिल्पवु दिनणवान् विष्टिकरोवुधेर्के हीनयसत्कृत 95
पंडिताराशा वोनवभं त्यजितसेवकंत्यशिल्प:॥३३॥ परकर्मकृत्परप्रेष्य: अस्वो निर्धन: शिल्पकर्मस्व
नुरतमति: ऋणवान्परस्वगृहणशील: विष्टिकरो भारवाह: एवंविध: अर्कजस्थे मकरकुंभगते बुधे जा
तो भवति नृपसत्कृत: राजपूजित: पंडितो विद्वान् आप्तवाक्यो व्यवहारार्थवित्ता एवंनवमे धन्विस्थे वुधे जातो
भवति बुधराशी स्वभाव:॥३३॥ अथ मेषवृश्चिक वृषतुल मिथुनकन्यागते जीवे जातस्य स्वरूपं शार्दूलवि
क्रीडितेनाह। सेनानीर्वहुवित्तदारतनयो दाताशु भृत्य: क्षमी तेजो दारगुणान्वित: सुरगुरौजात: पुमान्कौ

ब.ज्ञा. टी.

जमेकल्याणस्सधनार्थमित्रतनयस्त्यागीप्रियः प्रोक्तमेवौघेभूरिपरिच्छदात्मजसुहृत्साचिव्ययुक्तः सु ३३
रवी॥३९॥ सेनानीस्सेनानीयकः वड्वित्तदारतनयः अधिकधनकलत्रपुत्रः दाता दानशीलः सुभृत्युः शो
भनभृत्यः ह्रीमीसहितः तेजसा कांत्या दारगुणैः कलत्रसौख्यैः अन्वितोयुक्तः ख्यातः प्रख्यातकीर्त्तिः ए
वंविधस्सुरगुरौजीवेकोजके मेषवृश्चिकस्थेजातोभवति कल्याणस्स्वस्थदेहः सधनार्थमित्रतनयधने
गवाद्ये अर्थोवित्तं मित्राणिसुहृदः तनयाः अपत्यानि एतैस्सहितः त्यागीदाताप्रियः सर्वजनवल्लभः ए 96
वंविधः शौक्रभे वृषतुलस्थेजीवेजातोभवति भूरिपरिच्छदात्मजसुहृत् ब[illegible] भराम्बरणपुत्र
मित्रः साचिव्ययुक्तः मंत्रत्वेनियुक्तः सुखीभोगवान् एवंविधोबौधभे मिथुनकन्यास्थेजीवेजातोभवति॥
॥४०॥ अथकर्कटसिंहधान्विमीनकुंभमकरस्थेजीवेजातस्यस्वरूपं शार्दूलविक्रीडितेनाह। चान्द्रेर
त्नसुतस्वदारविभवप्रज्ञासुखैरन्वितस्सिंहेस्याद्बलनायकस्सुरगुरौ प्रोक्तंचयत्सौम्यभे स्वर्क्षेमांडलिकोनरेन्द्रस
चिवस्सेनापतिर्वाधनीकुंभेकर्कटवत्फलानिमकरेनीचोल्पवित्तस्सुखी॥४१॥ चान्द्रेरत्नानिमणयस्सुताः
पुत्राः स्वदाराः स्वपत्नीकलत्रम् विभवमैश्वर्यं प्रज्ञामेधासुखं भोगासक्तिः एतैरन्वितस्संयुक्तः एवंविधश्चा
न्द्रेकर्कटस्थेगुरौजीवेजातोभवति बलनायकः दंडनायकः अन्यच्चयत्प्रोक्तं बुधक्षेत्रे चंद्रभे कर्कटेरत्नसुत
सुखस्वदारविभवप्रज्ञासुखैरन्वितस्त्वेतानि सिंहेचगुरौ देवेज्ये स्याद्भवति मांडलिको मंडलाधिपतिः नरेन्द्रस
चिवः राजमंत्री सेनापतिस्सेनानायकः अथवाधनीवित्तवान् एवंविधस्स्वर्क्षे धान्विमीनस्थेजीवेजातोभवति॥
कुंभेकर्कटवद्दितानि फलानि कर्कटस्थेजीवेफलान्यभिहितानि रत्नसुतदारविभवप्रज्ञासुखैरन्वितस्त्वेतानिकुंभ

ब.ज्ञा. टी.

ज्येवेधन्विमीनलग्नस्थेभौमेजातोभवति दुःखार्त्तोनित्योद्विग्नाः अधनोनिधनः अटनः परिभ्रमणशीलः अन
तरोतसत्यभाषीतीक्ष्णः निःस्नेहः एवंविधः कुंभस्थेभौमेजातोभवति भूरिधनात्मजः प्रभूतार्थपुत्रः नृपोराजा
अपवातस्समोराजतुल्यः एवंविधोमृगगतेमकरस्थेभौमेजातोभवति भौमगत्यास्वभावः॥३४॥ अथमेषवृ
श्चिकतुलगतेबुधेजातस्यस्वरूपंव संततिलकेनाह॥ द्यूतस्यपानरतनास्तिकचौरनिस्स्वाः कुस्त्रीककूटकृ
दसत्यरतकुजर्क्षे आचार्यभूरिसुत दारधनार्जनेष्टः शौक्रेवदान्यगुरुभक्तिरतश्चसौम्ये॥३५॥ द्यूतरतः अ
क्षमानवित् पानरतः आसवासक्तः नास्तीकः पापात्मा[illegible] चौरस्तस्करः निस्स्वः दरिद्रः कुत्स्त्रीकः कु
त्सितभार्यः कूटकृत् कूटकर्त्ता असत्यरतः धर्माद्दुपेतः एवंविधः पुरुषः सौम्ये बुधे कुजर्क्षे मेषवृश्चिकस्थेजातो
भवति आचार्यउपदेशकर्त्ता भूरिसुतदारप्रभूतात्मजभार्यः धनार्जनेष्टः धनार्जनमिष्टं यस्य अर्थार्जनेर 97
तःस्याद्यैः वदन्योदाता गुरुभक्तिमतः मातापितृभक्तः एवंविधःपुरुषः शौक्रे वृषतुलस्थेबुधेजातोभवति॥
३५॥ अथमिथुनकर्कटस्थेबुधेजातस्यस्वरूपमिन्द्रवज्रयाह विकत्थनः शास्त्रकलाविदग्धः प्रियंवदस्सौ
ख्यरतस्तृतीये जलार्जितस्वस्स्वजनस्यशत्रुः शशांकजे शीतकरर्क्षयुक्ते॥३६॥ विकत्थनोवाचालः शास्त्रेषुवि
द्यासुकलागीतवाद्यनृत्तलेपकुसक्तः एवंविधः शशांकजेबुधेतृतीयेमिथुनस्थेजातोभवति जलेनदोवेनार्जि
तस्वंधनंयेनसोजलार्जितस्वः स्वजनस्यबंधुजनस्यशत्रुः रिपुः एवंविधः शीतकरर्क्षेकर्कटेबुधेजातोभवति
॥३६॥ अथसिंहकन्यास्थेबुधेस्वरूपंप्रहर्षिण्याह स्त्रीद्वेष्योविधनसुखात्मजोटनोज्ञः स्त्रीलोलस्सुपरिभ
वोर्कराशिगेज्ञे त्यागीज्ञः प्रचुरगुणस्सुखीक्षमावान्युक्तिज्ञोविगतभयश्चषष्ठराशौ॥३७॥ स्त्रीद्वेष्योयोषिता
मननिमतः विधनस्सुखात्मजः वित्तसौख्यपुत्ररहितः अटनः परिभ्रमणशीलः अस्त्रीलोलः कामी

तू ॥२३॥ नृपतिसत्कृतः राजपूजितः अटनः परिभ्रमणशीलः चमूपः सेनापतिः वणिक्क्रियविक्रयपरः सधनः
सार्थः हतधनु विहतदेहः चौर तस्करः भूरिविषयः विप्रकीर्णेन्द्रियः एवंविधं नरं मेषवृश्चिकस्थितः कु
जो भौमे जनयेत् प्रवृत्तिजितः स्त्रीविधेयः सुहृत्सु मित्रेषु विषमो दुर्विधेयः परदाररतः परिपोषितसुसतो
कुहकः इन्द्रजालिकः सुवेषः शोभनालंकारः भीरुः सभयः पुरुषो निःस्वः एवंविधान्गुणान् सितमथवा तुले
च स्थिते च भौमे जनयेदुत्पादयेत् ॥२४॥ अथ मिथुनकर्कटस्थे भौमे जातस्य स्वरूपं वसंततिलकेनाह ॥ वैदे
सहस्तनयवान् विसहृत्कृतज्ञो गांधर्वयुद्धकुशलः कृपणोऽभयोऽघी चान्द्रे यथावान् सलिलयानसमर्जितस्वः
प्रवासभूमितरये निकषचलस्म ॥२५॥ प्रसनूत्तेजस्वी तनयवान् पुत्रपुत्रः विसहृत् मित्ररहितः कृतज्ञः 98
परोपकारशीलः गांधर्वगीते युद्धे च संग्रामे प्रवेशनिर्गमव्यूहरचनादिषु कुशलः तज्ज्ञः कृपणः अधातः अ
भयो निर्भयः अघी धनवान् सलिलयान् समर्जितस्वः सलिलयानेन प्रवगदोना सम्यगर्जितं स्वं धनं येन ॥
अथवा सलिलेन यानप्रवादिना सम्यगर्जितस्वः प्राज्ञो मेधावी विकलांगहीनः खलो दुर्जनः एवंविधश्चान्द्रे कर्कट
गे भौमे जातो भवति ॥२५॥ अथ धर्मसिंहधन्विमीनकुंभमकरस्थे भौमे जातस्य स्वरूपं शार्दूलविक्रीडितेनाह ॥ निस्वः
क्लेशसहो वनान्तरचरः सिंहेऽल्पदारात्मजो जैवे नैकरिपुर्नरेन्द्रसचिवः ख्यातोऽभयोऽल्पात्मजः दुःखांतो विधनो
टनोऽनृततरः स्तौ हता अकुंभस्थिते भौमे भूरिधनात्मजोऽमृगगते भूपोऽथवा तत्समः ॥२६॥ निस्वः निर्धनः क्लेश
सहोऽनुद्विग्नः वनान्तरचरः अरण्यमध्यचारी अल्पदारात्मजः स्वल्पदारपुत्रः एवंविधः सिंहस्थे भौमे जातो भवति ।
अनेकरिपुः बहुरिपुः नरेन्द्रसचिवो राजमन्त्री ख्यातो विदितकीर्तिः अभयो निर्भयः अल्पात्मजः स्वल्पापत्यः एवंविधो

बृ॰जा॰ टी॰

कार्यकृत्व यार्जितधनः वहून मर्जयति तन्न स्व व्ययानि फलं भवति शास्त्रातगः शास्त्रनिपुणः एवंविधो
लि स्थि च अर्के जातो भवति संपूज्यः सततमर्चनीयः धनवान्वितपुत्रः तीक्ष्णो निरपेक्षः मिषभेद्य
प्रयोगतः कारुकः शिल्पिकर्मरतः एवंविधो धनुर्धरस्थेऽर्के जातो भवति नीचकुलानुचिताधर्मकर्मकृ
तत्रतो मूर्खः कुवणिक् कुत्सितवणिक् अल्पधनवान् लोकार्यलब्धः लोभाभिभूतः अन्यभा
गैरतः परार्थोपभोक्ता एवंविधो मृगे मकरस्थेऽर्के जातो भवति ॥२७॥ अथ घटकुंभमीनस्थेऽर्के जातस्य ।
स्वरूपं चन्द्रार्कयोरेकस्य प्रोक्तजातस्य लक्ष्मतानं वसंततिलकेनाह ॥ नीचो घटे तनयभाग्यपरिच्यु ।
तोऽस्वस्तोयोत्थिपण्यविभवो वनिताहतोऽत्य नक्षत्रमानवतनुः प्रतिमे विभाग लक्ष्मादिशेत् हिनरश्मि
दिनेशयोस्तु ॥२८॥ नीचः कुलानुचिताधर्मकर्मकृत् तनभाग्यपरिच्युतः पुत्रविभवरहितः अस्वः 99
निर्धनः एवंविधः घटे कुंभस्थेऽर्के जातो भवति तोयोत्थितं जलोत्पन्नं मुक्ताफलादि तत्पण्येन तद्विक्र
येन विभवमैश्वर्यं यस्य वनिताहृतः स्त्रीपूज्यः एवंविधोऽन्त्यमीनस्थेऽर्के जातो भवति नक्षत्रमानवतनु
रत्यादिनक्षत्रमानवकः राशिपुरुषः कालांगानीत्यादिप्रदर्शितः तुहिनरश्मिदिनेशयोश्चन्द्रार्कयोर्मेष
मेतौ यस्मिन्राशौ स्थितौ सुराशीनामेतत्रगपुरुषस्य यस्मिन्नंगे स्थितः तत्र पुरुषस्य जातस्य लक्ष्माचिह्नं
मषकादि समादिशेत् देहे लक्ष्मादित्यराशेः स्वभावः ॥२९॥ अथ मेषवृषमिथुनकर्कटतुलस्थे कुजे जा
तस्य स्वरूपं नर्कुटकेनाह ॥ नरपतिसत्कृतोऽटनश्चमूपवणिक्सधनः क्षतधनचौरभूरिविषयश्च
कुजः स्वगृहेऽपुचाति जितान्सुहृत्सु विषमान् परदाररतान्कुहकसुवेषभीरुपरुषान् सितभोजनयो

पगीतेवाद्येचवादनविधौकुशलश्चास्त्रिरवितः एवंविधोगविवृषस्थेसूर्येजातोभवति॥२८॥ अथमिथुनक
र्कटसिंहकन्यास्थसूर्येजातस्यस्वरूपंशार्दूलविक्रीडितेनाह। विद्याज्योतिषवित्तवान्मिथुनगेभानौकुलीर।
स्थितेतीक्ष्णःस्वःपरकार्यकृच्छ्रमपथचलैःशोभसंयुज्यते सिंहस्थेवनशैलगोकुलरतिर्वीर्यान्वितोसःपु
मानकन्यास्थेलिपिलेख्यकाव्यगणितज्ञानान्वितस्त्रीवपु॥२९॥ विद्यावान्व्याकरणज्ञःज्योति 100
षवान्ज्योतिज्ञाख्यातःवित्तवान्धनीएवंविधोमिथुनगेभानौसूर्येजातोभवति तीक्ष्णाः निर्दयः अस्वः
निर्धनःपरकार्यकृत्अन्येषांकर्मकर्त्ताश्रमेणखेदेनयथाअध्वनातिशैर्दृष्टैवेक्ष्यसर्वकालंयुज्य
ते एवंविधःकुलीरस्थेकर्कटेरवौजातोभवति वनशैलगोकुलगतिःएकांतपर्वतगोकुलेषुगन्तां वी
र्यान्वितोबलीअज्ञःमूर्खःएवंविधःपुमान्पुमान्पुरुषसिंहस्थेर्केजातोभवति लिपिलेख्यकाव्य
गणितज्ञानान्वितःअदारस्वनाचित्रकर्मकविलगणितज्ञानेपुरुः स्त्रीवपुः स्त्रीतुल्यशरीरः एवं
विधकन्यास्थेर्केजातोभवति॥३०॥ अथतुलवृश्चिकधन्विमकरस्थेजातस्यस्वरूपंशार्दूलविक्रीडितेना
